है इसलिए जिन कहलाता है, सब देव इससे नीचे है इसलिए महादेव कहलाता है, सुख देनेवाला है इसलिए शंकर कहलाता है ॥१३१॥ ज्ञान द्वारा कथंचित् सब पदार्थोंमे व्याप रहा है इसलिए विष्णु कहलाता है, ब्रह्मके स्वरूपका ज्ञाता है इसलिए ब्रह्मा कहलाता है और दुःखोका हरण करनेवाला है इसलिए हरि कहलाता है ॥१३२॥ इस प्रकार यद्यपि इसके अनेक नाम है तथापि वह अपने लक्षणकी अपेक्षा अनेक नही है, क्योकि वह साधनोसे भले प्रकार सिद्ध अनन्तगुणात्मक एक ही द्रव्य है ॥१३३॥ यद्यपि चौबीस तीर्थंकरोसे लेकर अन्ततक विचार करनेपर व्यक्ति रूपसे देव अनन्त हैं तथापि वह देवोका बहुत्व दोषाधायक नही है, क्योकि इन सबमे एक प्रकारका ही देवत्व पाया जाता है ॥१३४॥ जिस प्रकार दीपक अनेक हैं तो भी उससे प्रदीप सामान्यकी हानि नही होती, क्योकि जितने भी दीपक होते है वे सब एक ही प्रकारके पाये जाते है नाना प्रकारके नही। उसी प्रकार व्यक्ति रूपसे देवोके अनेक होनेपर भी कोई हानि नही है, क्योकि देवत्व सामान्यकी अपेक्षा सब देव एक है ॥१३५॥ यदि कोई ऐसी आशका करे कि नामकी अपेक्षा क्रमसे देवके अनन्त भेद रहे आवें, क्योकि न्यायानुसार एक एक गुणकी अपेक्षा एक एक नाम रखा जा सकता है सो ऐसी आशका करना भी ठीक नही है, क्योकि इस प्रकार नामकी अपेक्षा देवके मुख्य रूपसे सख्यात भेद ही सम्भव हैं, क्योकि वचन व्यवहार इससे अधिक नही दिखाई देता है ॥१३६-१३७॥ इसीसे पूर्वाचार्योंने सूत्रमे यह कहा है कि तत्त्व वचनके अगोचर है और बारह अंग तथा अंग बाह्यरूप श्रुत स्थूल अर्थको विषय करता है ॥१३८॥ सम्पूर्ण कर्मोंके क्षयसे सिद्धके ये आठ गुण होते हैं—क्षायिक ज्ञान, क्षायिक दर्शन, अतीन्द्रिय सुख और आत्मासे उत्पन्न होनेवाला वीर्य—ये चार अनन्तचतुष्टय होते हैं।।१३९॥ इनके सिवाय सम्यक्त्व, सूक्ष्मत्व, अव्याबाध और अगुरुलघु ये चार गुण और होते हैं ॥१४०॥ इस प्रकार जो ज्ञानादि अनन्त धर्मोंसे युक्त है, आठ कर्मोंसे रहित है, मुक्त है और अठारह दोषोसे रहित है वही देव सेवनीय है अन्य नही ॥१४१॥ वास्तवमे वही देव सच्चा गुरु है, वही मोक्ष मार्गका उपदेशक है, वही भगवान् है और वही मोक्ष मार्गका साक्षात् नेता है ॥१४२॥ इन अरहत और सिद्धोसे नीचे भी जो अल्पज्ञ है और उसी रूप अर्थात् दिगम्बरत्व, वीतरागत्व और हितोपदेशित्वको धारण करनेवाले हैं वे गुरु है, क्योकि इनमे

अस्त्यवस्थाविशेषोऽत्र युक्तिस्वानुभवागमात् । शेषसंसारिजीवेभ्यस्तेषामेवातिशायनात् ॥१४४
भाविनैगमनयायत्तो भूष्णुस्तद्वान्निवोच्यते । अवश्यं भावतो व्याप्तेः सद्भावात्सिद्धसाधनात् ॥१४५
अस्ति सद्दर्शनं तेषु मिथ्याकर्मोपशान्तितः । चारित्रं देशतः सम्यक् चारित्रावरणक्षतेः ॥१४६
ततः सिद्धं निसर्गाद्वै शुद्धत्वं हेतुदर्शनात् । मोहकर्मोदयाभावात् तत्कार्यस्याप्यसम्भवात् ॥१४७
तच्छुद्धत्वं सुविख्यातनिर्जराहेतुरञ्जसा । निदानं संवरस्यापि क्रमान्निर्वाणभागपि ॥१४८
यद्वा स्वयं तदेवार्थान्निर्जरादित्रयं यतः । शुद्धभावाविनाभावि द्रव्यनामापि तत्त्रयम् ॥१४९
निर्जरादिनिदानं यः शुद्धो भावश्चिदात्मकः । परमार्हः स एवास्ति तद्वानात्मा परः गुरुः ॥१५०
न्यायाद्गुरुत्वहेतुः स्यात्केवलं दोषसंक्षयः । निर्दोषो जगतः साक्षी नेता मार्गस्य नेतरः ॥१५१
नालं छद्मस्थताप्येषा गुरुत्वक्षतये मुनेः । रागाद्यशुद्धभावानां हेतुर्मोहैककर्म तत् ॥१५२
नन्वावृत्तिद्वयं कर्म वीर्यविध्वंसि कर्म तत् । अस्ति तत्राप्यवश्यं वै कुतः शुद्धत्वमत्र चेत् ॥१५३
सत्यं किन्तु विशेषोऽस्ति प्रोक्तकर्मत्रयस्य च । मोहकर्माविनाभूतं बन्धसत्त्वोदयक्षयम् ॥१५४
तद्यथा बध्यमानेऽस्मिन् तद्बन्धो मोहबन्धसात् । तत्सत्त्वे सत्त्वमेतस्य पाके पाकः क्षये क्षयः ॥१५५

न्यायानुसार गुरुका लक्षण पाया जाता है। ये उनसे भिन्न और कोई दूसरी अवस्थाको धारण करनेवाले नही हैं ॥१४३॥ इनमे अवस्था विशेष पाई जाती है यह बात युक्ति, आगम और अनुभवसे सिद्ध है, क्योकि उनमे शेष संसारी जीवोसे कोई विशेष अतिशय देखा जाता है ॥१४४॥ भावि नैगमनयकी अपेक्षासे जो होनेवाला है वह उस पर्यायसे युक्तकी तरह कहा जाता है, क्योकि उसमे नियमसे भावकी व्याप्ति पाई जाती है इसलिए ऐसा कहना युक्तियुक्त है ॥१४५॥ उनमे दर्शनमोहनीय कर्मकी उपशान्ति (उपशम, क्षय, क्षयोपशम) हो जानेसे सम्यग्दर्शन भी पाया जाता है और चारित्रावरण कर्मका एकदेश क्षय (क्षयोपशम) हो जानेसे सम्यक्चारित्र भी पाया जाता है ॥१४६॥ इसलिए उनमे स्वभावसे ही शुद्धता सिद्ध होती है और इसकी पुष्टि करनेवाला हेतु भी पाया जाता है। यत उनके मोहनीय कर्मका उदय नही है अत वहाँ मोहनीय कर्मका कार्य भी नही पाया जाता है ॥१४७॥ उनकी यह शुद्धता नियमसे निर्जराका कारण है, संवरका कारण है और क्रमसे मोक्ष दिलानेवाली है यह बात सुप्रसिद्ध है ॥१४८॥ अथवा वह शुद्धता ही नियमसे स्वय निर्जरा आदि तीन रूप है, क्योकि शुद्ध भावोसे अविनाभाव रखनेवाला द्रव्य इन तीन रूप ही होता है ॥१४९॥ आशय यह है कि आत्माका जो शुद्ध भाव निर्जरा आदिका कारण है वही परमपूज्य है और उससे युक्त आत्मा ही परम गुरु है ॥१५०॥ न्यायानुसार गुरुपनेका कारण केवल दोषोका नाश हो जाना ही है। जो निर्दोष है वही जगत्का साक्षी है और वही मोक्षमार्ग का नेता है अन्य नही ॥१५१॥ मुनिकी यह छद्मस्थता भी गुरुपनेका नाश करनेके लिए समर्थ नही है, क्योकि रागादि अशुद्ध भावोका कारण एक मोह कर्म माना गया है ॥१५२॥ शका—छद्मस्थ गुरुओमे दोनो आवरण कर्म और वीर्यका नाश करनेवाला अन्तरायकर्म नियमसे है इसलिए उनमे शुद्धता कैसे हो सकती है ? ॥१५३॥

समाधान—यह बात ठीक है किन्तु इतनी विशेषता है कि उक्त तीनों कर्मोंका बन्ध, सत्त्व, उदय और क्षय मोहनीय कर्मके साथ अविनाभावी है ॥१५४॥ खुलासा इस प्रकार है कि मोहनीय-का बन्ध होनेपर उसके साथ साथ ज्ञानावरणादि कर्मोंका बन्ध होता है। मोहनीयका सत्त्व रहते हुए इनका सत्त्व रहता है, मोहनीयका पाक होते समय इनका पाक होता है और मोहनीयका क्षय

मोहं छद्मस्थावस्थायामर्वागेवास्तु तत्क्षय । अंशान्मोहक्षयस्यांशात्सर्वत सर्वत क्षय ॥१५६
नासिद्धं निर्जरा तस्य सद्दृष्टे कृत्स्नकर्मणाम् । आदृङ्मोहोदयाभावात्तच्चासंख्यगुणा क्रमात् ॥१५७
तत कर्मत्रय प्रोक्तमस्ति यद्यपि सांप्रतम् । रागद्वेषविमोहानामभावाद् गुरुता मता ॥१५८
अथाऽस्त्येक. स सामान्यात्तद्विशेषात्त्रिधा मत । एकोऽप्यग्निर्यथा तार्ण्य पार्ण्यो दार्व्यस्त्रिधोच्यते १५९
आचार्य स्यादुपाध्याय साधुश्चेति त्रिधा गति । स्युर्विशिष्टपदारूढास्त्रयोऽपि मुनिकुञ्जरा ॥१६०
एको हेतु क्रियाऽप्येका वेषश्चैको बहि समः । तपो द्वादशधा चैकं व्रतं चैक च पञ्चधा ॥१६१
त्रयोदशविधं चैक चारित्रं समतैकधा । मूलोत्तरगुणाश्चैको संयमोऽप्येकधा मत ॥१६२
परीषहोपसर्गाणां सहन च सम स्मृतम् । आहारादिविधिश्चैकश्चर्यास्थानासनादय ॥१६३
मार्गो मोक्षस्य सद्दृष्टिः ज्ञान चारित्रमात्मन । रत्नत्रय सम तेषामपि चान्तर्बहिस्थितम् ॥१६४
ध्याता ध्यानं च ध्येयश्च ज्ञाता ज्ञानं च ज्ञेयसात् । चतुर्विधाराधनापि तुल्या क्रोधादिजिष्णुता ॥१६५
किंचात्र बहुनोक्तेन तद्विशेषोऽवशिष्यते । विशेषाच्छेषनिःशेषो न्यायादस्त्यविशेषभाक् ॥१६६
आचार्योऽनादितो रूढेर्योगादपि निरुच्यते । पञ्चाचार परेभ्य स आचारयति सयमी ॥१६७
अपि छिन्ने व्रते साधो पुनः सन्धानमिच्छत । तत्समादेशदानेन प्रायश्चित्त प्रयच्छति ॥१६८

होने पर इनका क्षय होता है ॥१५५॥ यदि कोई ऐसी आशका करे कि छद्मस्थ अवस्थामे ज्ञानावरणादि कर्मोका क्षय होनेके पहले ही मोहनीयका क्षय हो जाता है सो ऐसी आशका करना भी ठीक नही है, क्योकि मोहनीयका एकदेश क्षय होनेसे इनका एकदेश क्षय होता है और मोहनीयका सर्वथा क्षय होनेसे इनका भी सर्वथा क्षय हो जाता है ॥१५६॥ सम्यग्दृष्टिके समस्त कर्मोकी निर्जरा होती है यह बात असिद्ध भी नही है, क्योकि दर्शनमोहनीयके उदयका अभाव होनेपर वहाँसे लेकर वह उत्तरोत्तर असख्यात गुणी होने लगती है ॥१५७॥ इसलिये छद्मस्थ गुरुओके यद्यपि वर्तमानमे तीनो कर्मोका सद्भाव कहा गया है। तथापि राग, द्वेष और मोहका हो अभाव हो जानेसे उनमे गुरुपना माना गया है ॥१५८॥ वह गुरु सामान्य रूपसे एक प्रकारका और अवस्था विशेषकी अपेक्षासे तीन प्रकारका माना गया है। जैसे अग्नि यद्यपि एक ही है तो भी वह तिनकेकी अग्नि, पत्तेकी अग्नि और लकडीकी अग्नि इस तरह तीन प्रकारकी कही जाती है। वैसे ही प्रकृतमे जानना चाहिये ॥१५९॥ इनके ये भेद आचार्य, उपाध्याय और साधु ये तीन है। ये तीनो ही मुनिकुजर यद्यपि अपने अपने विशेष पद पर स्थित हैं ॥१६०॥ तथापि इनके मुनि होनेका कारण एक है, क्रिया एक है, बाह्य वेष एक सा है, बारह प्रकारका तप एक सा है, पाँच प्रकारका व्रत एक सा है, तेरह प्रकारका चारित्र एक सा है, समता एक सी है, मूल और उत्तर गुण भी एकसे हैं, सयम भी एक सा है, परीषह और उपसर्गोका सहन करना भी एक सा है, आहार आदिकी विधि भी एक सी है, चर्या, स्थान और आसन आदि भी एकसे हैं, मोक्षका मार्ग जो सम्यग्दर्शन और सम्यग्ज्ञान और सम्यक्चारित्र रूप आत्मीक रत्नत्रय है वह भी उनके भीतर और बारह समान है। इसी प्रकार ध्याता, ध्यान, ध्येय, ज्ञाता, ज्ञान, ज्ञय, चार प्रकारकी आराधनाएँ और क्रोधादिकका जीतना ये भी समान हैं ॥१६१–१६५॥ इस विषयमे बहुत कहाँ तक कहे। उनका जो कुछ विशेष है वही कहना बाकी है, क्योकि विशेष रूपमे जो भी शेष रह जाता है वह न्यायानुसार अविशेष (समान) कहलाता है ॥१६६॥ अनादिकालीन रूढि और निरुक्त्यर्थ इन दोनोकी अपेक्षासे आचार्य शब्दका यह अर्थ लिया जाता है कि जो सयमी दूसरोसे पाँच आचारका आचरण कराता है वह आचार्य है ॥१६७॥ तथा व्रतभग होने पर फिरसे उस व्रतको जोडनेकी इच्छा करनेवाले साधुको जो आदेश

आदेशस्योपदेशेभ्यः स्याद्विशेषः स भेदभाक् । आददे गुरुणा दत्तं नोपदेशेष्वयं विधिः ॥१६९
न निषिद्धस्तदादेशो गृहिणां व्रतधारिणाम् । दीक्षाचार्येण दीक्षेव दीयमानास्ति तत्क्रिया ॥१७०
स निषिद्धो यथाम्नायादव्रतिनां मनागपि । हिंसकश्चोपदेशोऽपि नोपयुज्योऽत्र कारणात् ॥१७१
मुनिव्रतधराणां वा गृहस्थव्रतधारिणाम् । आदेशश्चोपदेशो वा न कर्तव्यो वधाश्रितः ॥१७२
न चाऽऽशङ्क्यं प्रसिद्धं यन्मुनिभिर्व्रतधारिभिः । मूर्तिमच्छक्तिसर्वस्वं हस्तरेखेव दर्शितम् ॥१७३
नूनं प्रोक्तोपदेशोऽपि न रागाय विरागिणाम् । रागिणामेव रागाय ततोऽवश्यं स वर्जितः ॥१७४
न निषिद्धः स आदेशो नोपदेशो निषेधितः । नूनं सत्पात्रदानेषु पूजायामर्हतामपि ॥१७५
यद्वाऽऽदेशोपदेशौ स्तो द्वौ तौ निरवद्यकर्मणि । यत्र सावद्यलेशोऽपि तत्राऽऽदेशो न जातुचित् ॥१७६
सहासंयमिभिर्लोकैः संसर्गं भाषणं रतिम् । कुर्यादाचार्य इत्येके नासौ सूरिर्न चार्हतः ॥१७७
सङ्घसम्पोषकः सूरिः प्रोक्तः कैश्चिन्मतेरिह । धर्मादेशोपदेशाभ्यां नोपकारोऽपरोऽस्त्यतः ॥१७८

यद्वा मोहात्प्रमादाद्वा कुर्याद्यो लौकिकीं क्रियाम् ।
तावत्कालं स नाचार्योऽप्यस्ति चान्तर्व्रताच्च्युतः ॥१७९

इत्युक्तव्रततपःशीलसंयमादिधरो गणी । नमस्यः स गुरुः साक्षात्तदन्यो न गुरुर्गणी ॥१८०

द्वारा प्रायश्चित्त देता है वह आचार्य है ॥१६८॥ उपदेशोसे आदेशमे पार्थक्य दिखलाने वाला यह अन्तर है कि आदेशमे 'मैं गुरुके द्वारा दिये गये व्रतको स्वीकार करता हूँ' यह विधि मुख्य रहती है किन्तु उपदेशोमे यह विधि मुख्य नही रहती ॥१६९॥ व्रतधारी गृहस्थोके लिये भी आचार्यका आदेश करना निषिद्ध नही है, क्योकि दीक्षाचार्यके द्वारा दी गयी दीक्षाके समान ही वह आदेशविधि मानी गई है ॥१७०॥ किन्तु जो अव्रती हैं, उनके लिए आगमकी परिपाटीके अनुसार थोड़ा भी आदेश करना निषिद्ध है और इसी प्रकार कारणवश हिंसाकारी उपदेश करना भी उपयुक्त नही है ॥१७१॥ चाहे मुनिव्रतधारी हो चाहे गृहस्थव्रतधारी हो इन दोनोके लिये हिंसाका अवलम्बन करनेवाला आदेश और उपदेश नही करना चाहिये ॥१७२॥ जो यह प्रसिद्ध है कि व्रतधारी मुनि मूर्तिमान पदार्थोंकी समस्त शक्तियोको हस्तरेखाके समान दिखला देते हैं इसलिये उक्त उपदेश और आदेश उनका कुछ भी बिगाड नही कर सकता सो ऐसी आशका करना भी ठीक नही है, क्योकि यद्यपि पूर्वोक्त उपदेश विरागियोके लिए रागका कारण नही है तो भी जो रागी हैं उनके लिये वह रागका कारण अवश्य है इसलिये उसका निषेध किया गया है ॥१७३-१७४॥ किन्तु सत्पात्रोके लिये दान और अरहन्तोकी पूजा इन कार्योंमे न तो वह आदेश ही निषिद्ध है और न वह उपदेश ही निषिद्ध है ॥१७५॥ अथवा आदेश और उपदेश ये दोनो ही निषिद्ध कार्योंके विषयमे उचित माने गये हैं, क्योकि जिस कार्यमे सावद्यका लेशमात्र भी हो उस कार्यका आदेश करना कभी भी उचित नही है ॥१७६॥ कितने ही आचार्योंका मत है कि आचार्य असयमी पुरुषोके साथ सम्बन्ध, भाषण और प्रीति कर सकता है परन्तु उनका ऐसा कहना ठीक नही है क्योकि ऐसा करनेवाला न तो आचार्य ही हो सकता है और न अरहन्तके मतका अनुयायी ही हो सकता है ॥१७७॥ जो संघका पालन-पोषण करता है वह आचार्य है ऐसा किन्ही अन्य लोगोने ही अपनी मतिसे कहा है अत यही निश्चय होता है कि धर्मका आदेश और उपदेशके सिवाय आचार्यका और कोई उपकार नही है ॥१७८॥ अथवा मोहवश या प्रमाद वश होकर जो लौकिकी क्रियाको करता है वह उतने काल तक आचार्य नही रहता इतना ही नहीं किन्तु तब वह अन्तरगमे व्रतोसे च्युत हो जाता है ॥१७९॥ इस प्रकार पूर्वोक्त व्रत, तप, शील और सयम आदिको धारण करने-

उपाध्याय स साध्वीयान् वादी स्याद्वादकोविद ।
वाग्मी वाग्ब्रह्मसर्वज्ञ सिद्धान्तागमपारग ॥१८१
कवि प्रत्यग्रसूत्राणां शब्दार्थै सिद्धसाधनात् । गमकोऽर्थस्य माधुर्ये धुर्यो वक्तृत्ववर्त्मनाम् ॥१८२
उपाध्यायत्वमित्यत्र श्रुताभ्यासोऽस्ति कारणम् । यदध्येति स्वय चापि शिष्यानध्यापयेद्गुरु ॥१८३
शेषस्तत्र व्रतादीनां सर्वसाधारणो विधि । कुर्याद्धर्मोपदेश स नादेश सूरिवत्क्वचित् ॥१८४
तेषामेवाश्रम लिङ्ग सूरीणां सयम तप । आश्रयेत् शुद्धचारित्र पञ्चाचार स शुद्धधी ॥१८५
मूलोत्तरगुणानेव यथोक्तानाचरेच्चिरम् । परीषहोपसर्गाणां विजयी स भवेद् ध्रुवम् ॥१८६
अत्राऽतिविस्तरेणाल नूनमन्तर्बहिर्मुने । शुद्धवेषधरो धीरो निर्ग्रन्थ स गणाग्रणी ॥१८७
उपाध्याय समाख्यातो विख्यातोऽस्ति स्वलक्षणै । अधुना साध्यते साधोर्लक्षणं सिद्धमागमात् ॥१८८
मार्गो मोक्षस्य चारित्रं सद्दृग्ज्ञप्तिपुरस्सरम् । साधयत्यात्मसिद्ध्यर्थं साधुरन्वर्थसंज्ञक ॥१८९
नोचे वाचयमी किञ्चिद्धस्तपादादिसंज्ञया । न किञ्चिद्दर्शयेत्स्वस्थो मनसाऽपि न चिन्तयेत् ॥१९०
आस्ते स शुद्धमात्मानमास्तिघ्नुवानश्च परम् । स्तिमितान्तर्बहिर्जल्पो निस्तरङ्गाब्धिवन्मुनि ॥१९१
नादेशं नोपदेशं वा नादिशेत्स मनागपि । स्वर्गापवर्गमार्गस्य तद्विपक्षस्य किं पुन ॥१९२
वैराग्यस्य परां काष्ठामधिरूढोऽधिकप्रभ । दिगम्बरो यथाजातरूपधारी दयापर ॥१९३

वाला आचार्य ही नमस्कार करने योग्य है और वही साक्षात् गुरु है। इससे भिन्न स्वरूपका धारण करनेवाला न तो गुरु ही हो सकता है और न आचार्य ही हो सकता है ॥१८०॥ समाधान करनेवाला, वाद करनेवाला, स्याद्वाद विद्याका जानकार, वाग्मी, वचन ब्रह्ममे पारगत, सिद्धान्त शास्त्रका पारगामी, वृत्ति तथा मुख्य सूत्रोका शब्द और अर्थके द्वारा सिद्ध करनेवाला होनेसे कवि, अर्थकी मधुरताका ज्ञान करनेवाला और वक्तृत्व कलामे अग्रणी उपाध्याय होता है ॥१८१–१८२॥ उपाध्याय होनेमे मुख्य कारण श्रुतका अभ्यास है। जो स्वय पढता है और शिष्योको पढाता है वह उपाध्याय है ॥१८३॥ उपाध्यायका व्रतादिक सम्बन्धी शेष सब विधि मुनियोके समान होती है। यह धर्मका उपदेश कर सकता है किन्तु आचार्यके समान किसीको आदेश नही कर सकता ॥१८४॥ शुद्ध बुद्धि वाला वह उन्ही आचार्योके आश्रममे रहता है। उन्हीके सयम, तप, शुद्ध चारित्र और पचाचारका पालन करता है ॥१८५॥ वह चिरकालतक शास्त्रोक्त विधिसे मूल-गुणो और उत्तरगुणोका पालन करता है। परीषह और उपसर्गोको जीतनेवाला होता है तथा जितेन्द्रिय होता है ॥१८६॥ यहाँपर अधिक विस्तार करना व्यर्थ है किन्तु इतना ही कहना पर्याप्त है कि वह अन्तरग और बहिरग दोनो प्रकारसे मुनिके शुद्ध वेषको धारण करनेवाला, बुद्धिमान्, निर्ग्रन्थ और गणमे प्रधान होता है ॥१८७॥ इस प्रकार अपने लक्षणोसे प्रसिद्ध उपाध्यायका स्वरूप कहा। अब साधुके लक्षणका विचार करते है जो कि आगममे भलीभाँति सिद्ध है ॥१८८॥ मोक्षका मार्ग सम्यग्दर्शन और सम्यग्ज्ञान पूर्वक सम्यक्चारित्र है। जो आत्मसिद्धिके लिए इसका साधन करता है वह साधु है। यह इसका सार्थक नाम है ॥१८९॥ यह साधु स्वस्थ रहता है इसलिए न तो कुछ कहता है, न हाथ पैर आदिसे किसी प्रकारका इशारा करता है और न मनसे ही कुछ विचार करता है ॥१९०॥ किन्तु वह मुनि केवल शुद्ध आत्मामे लीन रहता है, अन्तरग और बहिरंग जल्पसे रहित हो जाता है और तरंग रहित समुद्रके समान शान्त रहता है ॥१९१॥ वह स्वर्ग और मोक्षके मार्गका थोडा भी न तो आदेश करता है और न उपदेश ही करता है फिर विपक्षका तो कर ही कैसे सकता है ॥१९२॥ वैराग्यकी चरम सीमाको प्राप्त, अधिक प्रभावान्,

निर्ग्रन्थोऽन्तर्बहिर्मोहग्रन्थेरुद्ग्रन्थको यमी । कर्मनिर्जरकः श्रेण्या तपस्वी स तपःशुचिः ॥१९४
परीषहोपसर्गाद्यैरजय्यो जितमन्मथः । एषणाशुद्धिसंशुद्धः प्रत्याख्यानपरायणः ॥१९५
इत्याद्यनेकधाऽनेकैः साधुः साधुगुणैः श्रितः । नमस्यः श्रेयसेऽवश्यं नेतरो विदुषां महान् ॥१९६
एवं मुनित्रयी ख्याता महतो महतामपि । तद्विशुद्धिविशेषोऽस्ति क्रमात्तरतमात्मकः ॥१९७

तत्राचार्यः प्रसिद्धोऽस्ति दीक्षादेशाद्गुणाग्रणी ।
न्यायाद्वा देशतोऽध्यक्षात् सिद्धः स्वात्मन्यतत्परः ॥१९८

अर्थान्नातत्परोऽप्येष दृङ्मोहानुदयात्सतः । अस्ति तेनाविनाभूतशुद्धात्मानुभवः स्फुटम् ॥१९९
अप्यस्ति देशतस्तत्र चारित्रावरणक्षतिः । बाह्यार्थात् केवलं न स्यात्क्षतिर्वापि तदक्षतिः ॥२००
तथापि न बहिर्वस्तु स्यात्तद्धेतुरहेतुतः । अस्त्युपादानहेतोश्च तत्क्षतिर्वा तदक्षतिः ॥२०१
सन्ति संज्वलनस्योच्चैः स्पर्द्धका देशघातिनः । तद्विपाकोऽस्त्यमन्दो वा मन्दो हेतुः क्रमाद्द्वयोः २०२
संक्लेशस्तत्क्षतिर्नूनं विशुद्धिस्तु तदक्षतिः । सोऽपि तरतमस्वांशैः साऽप्यनेकैरनेकधा ॥२०३
अस्तु यद्वा न शैथिल्यं तत्र हेतुवशादिह । तथाप्येतावताचार्यः सिद्धो नात्मन्यतत्परः ॥२०४
तत्रावश्यं विशुद्ध्यंशस्तेषां मन्दोदयादिह । संक्लेशांशोऽथवा तीव्रोदयान्नायं विधिः स्मृतः ॥२०५

दिगम्बर जन्मके समय जैसा रूप होता है वैसे रूपको धारण करनेवाला, दयाशील, निर्ग्रन्थ, अन्तरग और बहिरग मोहकी गाँठको खोलनेवाला, व्रतोको जीवन पर्यन्त पालनेवाला, गुणश्रेणि-रूपसे कर्मोको निजरा करनेवाला, तपरूपी किरणोको तपनेसे तपस्वी, परीषह और उपसर्ग आदिसे अजेय, कामको जीतनेवाला, शास्त्रोक्तविधिसे आहार लेने वाला और प्रत्याख्यानमे तत्पर इत्यादि अनेक प्रकारके साधुके योग्य अनेक गणोको धारण करनेवाला साधु होता है। ऐसा साधु कल्याणके लिये नियमसे नमस्कार करने योग्य है इससे विपरीत कोई यदि विद्वानोमे श्रेष्ठ भी हो तो वह नमस्कार करने योग्य नही है ॥१९३–१९६॥

इस प्रकार यद्यपि श्रेष्ठमे भी श्रेष्ठ इन तीन प्रकारके मुनियोका व्याख्यान किया तथापि उनमे तरतमरूप कुछ विशेषता पाई जाती है ॥१९७॥ वह इस प्रकार है—उन तीनोमे जो दीक्षा और आदेश देता है वह गणका अग्रणी आचाय है। वह अपनी आत्मामे लीन रहता है यह बात युक्ति आगम और अनुभवसे सिद्ध है ॥१९८॥ इसके दर्शन मोहनीयका अनुदय होता है इसलिये यह वास्तवमे अपनी आत्मामे अतत्पर नही है। किन्तु इसके उससे अविनाभाव सम्बन्ध रखनेवाला शुद्ध आत्माका अनुभव नियमसे पाया जाता है ॥१९९॥ दूसरे इसके चारित्र मोहनीयका एक देश क्षय भी पाया जाता है। क्योकि चारित्रकी हानि और लाभ केवल बाह्य पदार्थके निमित्तसे नहीं होता है ॥२००॥ किन्तु उपादान कारणके बलसे चारित्रकी हानि या उसका लाभ होता है। तब भी अहेतु होनेसे बाह्य वस्तु उसका कारण नही है ॥२०१॥ वास्तवमे सज्वलन कषायके जो देश-घाति स्पर्धक पाये जाते हैं उनका तीव्र और मन्द उदय ही क्रमसे चारित्रकी क्षति और अक्षतिका कारण है ॥२०२॥ सक्लेश नियमसे चारित्रकी क्षतिका कारण है और विशुद्धि चारित्रकी हानिका कारण नही है और वह संक्लेश तथा विशुद्धि भी अपने तरतमरूप अशोकी अपेक्षा अनेक प्रकारकी है। और ये तरतमरूप भी अपने अवान्तर भेदोकी अपेक्षा अनेक प्रकारके हैं ॥२०३॥ अथवा कारणवश आचार्यके चारित्रमे कदाचित् शिथिलता भी होवे और कदाचित् न भी होवे तो भी इतने मात्रसे आचार्य अपनी आत्मामे अतत्पर है यह बात सिद्ध नहीं होती ॥२०४॥ उनके देशघाति

किन्तु दैवाद्विशुद्ध्यंशः संक्लेशांशोऽथवा क्वचित् । तद्विशुद्धेर्विशुद्ध्यंशः संक्लेशांशादयं पुनः ॥ २०६
तेषां तीव्रोदयात्तावदेतावानत्र बाधकः । सर्वतश्चेत्प्रकोपी च नापराधोऽस्त्यतोऽपरः ॥२०७
तेनात्रैतावता नूनं शुद्धस्यानुभवच्युतिः । कर्तुं न शक्यते यस्मादत्रास्त्यन्यः प्रयोजकः ॥२०८
हेतुः शुद्धात्मनो ज्ञाने शमो मिथ्यात्वकर्मणः । प्रत्यनीकस्तु तत्रोच्चैरशमस्तस्य व्यत्ययात् ॥२०९
दृङ्मोहेऽस्तङ्गते पुंसः शुद्धस्यानुभवो भवेत् । न भवेद्विघ्नकरः कश्चिच्चारित्रावरणोदयः ॥२१०
न चाकिञ्चित्करश्चैवं चारित्रावरणोदयः । दृङ्मोहस्य कृते नालमलं स्वस्य कृते च यः ॥२११
कार्यं चारित्रमोहस्य चारित्राच्च्युतिरात्मनः । नात्मदृष्टेस्तु दृष्टित्वान्न्यायादितरदृष्टिवत् ॥२१२
यथा चक्षुः प्रसन्नं वै कस्यचिद्दैवयोगतः । इतरत्राक्षतापेऽपि दृष्टाध्यक्षान्न तत्क्षतिः ॥२१३
कषायाणामनुद्रेकश्चारित्रं तावदेव हि । नानुद्रेकः कषायाणां चारित्राच्च्युतिरात्मनः ॥२१४
ततस्तेषामनुद्रेकः स्यादुद्रेकोऽथवा स्वतः । नात्मदृष्टेः क्षतिर्नूनं दृङ्मोहस्योदयादृते ॥२१५
अथ सूरिरुपाध्यायः द्वावेतौ हेतुतः समौ । साधुरिवात्मज्ञौ शुद्धौ शुद्धौ शुद्धोपयोगिनौ ॥२१६
नापि कश्चिद्विशेषोऽस्ति द्वयोस्तरतमो मिथः । नैताभ्यामन्तरुत्कर्षः साधोरप्यतिशायनात् ॥२१७

स्पर्धकोके मन्द उदय होनेसे नियमसे विशुद्धता होती है और देशघाति स्पर्धकोके तीव्र उदय होनेसे संक्लेश होता है यह विधि नही मानी गई है ॥२०५॥ किन्तु दैववश उनके कही पर विशुद्धयंश भी होता है और दैववश कही पर संक्लेशांश भी होता है। यदि चारित्रकी विशुद्धि है तो विशुद्धयंश होता है और यदि संक्लेशांशका उदय होता है तो संक्लेश भी होता है ॥२०६॥ उन देशघाति स्पर्धकोंका तीव्र उदय तो केवल इतना ही आचार्यके बाधक है कि यदि वह सर्वथा प्रकोपका कारण है ऐसा मान लिया जाय तो इससे बडा और कोई अपराध नही है ॥२०७॥ इसलिये यहाँ पर इतने मात्रसे आचार्यके शुद्ध अनुभवकी च्युति नही की जा सकती, क्योंकि इसका कारण कोई दूसरा है ॥२०८॥ मिथ्यात्व कर्मका अनुदय शुद्ध आत्माके ज्ञानमे कारण है और उसका तीव्र उदय इसमें बाधक है, क्योकि मिथ्यात्वका उदय होने पर शुद्ध आत्माके ज्ञानका विनाश देखा जाता है ॥२०९॥ दर्शनमोहनीयका अभाव होनेपर शुद्ध आत्माका अनुभव होता है इसलिये चारित्रावरण-का किसी भी प्रकारका उदय उसका बाधक नही है ॥२१०॥ एतावता चारित्रावरणका उदय अकिंचित्कर है यह बात नही है क्योकि यद्यपि वह दर्शनमोहनीयका कार्य करनेमे असमर्थ है तथापि वह अपना कार्य करनेमे अवश्य समर्थ है ॥२११॥ चारित्र-मोहनीयका कार्य आत्माको चारित्रसे च्युत करना है आत्मदृष्टिसे च्युत करना उसका काय नही, क्योकि न्यायसे विचार करने पर इतर दृष्टियोके समान वह भी एक दृष्टि है ॥२१२॥ जिस प्रकार दैवयोगसे यदि किसीकी एक आँख निर्मल है तो यह प्रत्यक्षसे देखते हैं कि दूसरी आँखमे सतापके होने पर भी उसकी हानि नहीं होती। उसी प्रकार चारित्र मोहके उदयसे चारित्रगुणमे विकारके होने पर भी आत्माके सम्यक्त्व गुणकी हानि नही होती ॥२१३॥ जब तक कषायोका अनुदय है तभी तक चारित्र है और कषायोका उदय ही आत्माका चारित्रसे च्युत होना है ॥२१४॥

इसलिये चाहे कषायोका अनुदय हो चाहे उदय हो पर दर्शनमोहनीयके उदयके बिना इतने मात्रसे सम्यग्दर्शनकी कोई हानि नही होती ॥२१५॥ अन्तरंग कारणकी अपेक्षा विचार करने पर आचार्य और उपाध्याय ये दोनो ही समान हैं, साधु हैं, साधुके समान आत्मज्ञ हैं, शुद्ध हैं और शुद्ध उपयोगवाले हैं ॥२१६॥ इन दोनोमे परस्पर तरतमरूप कोई विशेषता नही है और न इन दोनोसे साधुमे भी अतिशयरूपसे कोई भीतरी उत्कर्ष पाया जाता है ॥२१७॥ यदि इनमे परस्पर

केवलतोऽस्ति विशेषश्चेन्मिथस्तेषां बहिः कृत । का क्षतिर्मूलहेतो स्यादन्त शुद्धिसमन्वित ॥२१८
नास्त्यत्र नियत कश्चिद्युक्तिस्वानुभवागमात् । मन्दादिरुदयस्तेषां सूर्युपाध्यायसाधुषु ॥२१९
प्रत्येकं बहव. सन्ति सूर्युपाध्यायसाधव । जघन्यमध्यमोत्कृष्टभावैश्चैकैकश पृथक् ॥२२०
कश्चित्सूरि कदाचिद्वै विशुद्धिं परमां गत । मध्यमां वा जघन्यां वा स्वोचितां पुनराश्रयेत् ॥२२१
हेतुस्तत्रोदिता नानाभावांशै स्पर्द्धका क्षणम् । धर्मादेशोपदेशादिहेतुर्नात्र बहि क्वचित् ॥२२२
परिपाट्यानया योज्या पाठका साधवश्च ये । न विशेषो यतस्तेषां नियत शेषो विशेषभाक् ॥२२३
न तु धर्मोपदेशादि कर्म तत्कारण बहि । हेतोरभ्यन्तरस्यापि बाह्य हेतुर्बहि क्वचित् ॥२२४
नैवमर्थाद्यत सर्वं वस्त्वकिञ्चित्कर बहि । तत्पद फलवन्मोहादिच्छतोऽप्यान्तरं परम् ॥२२५
किं पुनर्गणिनस्तस्य सर्वतोऽनिच्छतो बहि । धर्मादेशोपदेशादिस्वपद तत्फल च यत् ॥२२६
नास्यासिद्ध निरीहत्व धर्मादेशादिकर्मणि । न्यायादक्षार्थकाङ्क्षाया ईहा नान्यत्र जातुचित् ॥२२७
ननु नेहां विना कर्म कर्म नेहां विना क्वचित् । तस्मान्नानीहित कर्म स्यादक्षार्थस्तु वा न वा ॥२२८

थोडी बहुत विशेषता है भी तो वह बाह्य क्रियाकृत ही है क्योंकि इन तीनोका मूलकारण अन्तरंग शुद्धि जब कि समान है तो बाह्य विशेषतासे क्या हानि है अर्थात् कुछ भी हानि नहीं है ॥२१८॥ इन आचार्य, उपाध्याय और साधुके कषायोका कोई भी मन्दादि उदय नियत नहीं है। युक्ति, स्वानुभव और आगमसे तो यही ज्ञात होता है कि इनके किसी भी प्रकारके अशोंका उदय सम्भव है ॥२१९॥

आचार्य, उपाध्याय और साधु इनमेसे प्रत्येकके अनेक भेद हैं जो पृथक्-पृथक् एक-एकके जघन्य, मध्यम और उत्कृष्ट भावोकी अपेक्षासे प्राप्त होते हैं ॥२२०॥ कोई आचार्य कदाचित् उत्कृष्ट विशुद्धिको प्राप्त होकर फिर मध्यम या जघन्य विशुद्धिको प्राप्त होता है ॥२२१॥ नाना अविभाग प्रतिच्छेदोको लिये हुए प्रति समय उदयमे आनेवाले सज्वलन कषायके देशघाति स्पर्धक ही इसका कारण हैं, धमका आदेश या उपदेश आदि रूप बाह्यक्रिया इसका कारण नही हैं ॥२२२॥ जिस परिपाटीसे आचार्योंके भेद बतलाये हैं इसी परिपाटीसे उपाध्याय और साधुओके भेद भी घटित कर लेने चाहिये क्योंकि युक्तिसे विचार करनेपर आचायसे इनमे अन्तरंगमे और कोई विशेषता शेष नही रहती। वे तीनो समान हैं ॥२२३॥ शका—धर्मका उपदेश आदि बाह्यकार्य आचार्य आदिकी विशेषताका कारण रहा आवे, क्योंकि बाह्यहेतु कहींपर आभ्यन्तर हेतुका बाह्य निमित्त होता है ॥२२४॥ समाधान—ऐसा कहना ठीक नही है क्योंकि समस्त बाह्य पदार्थ वास्तवमे अकिञ्चित्कर हैं। अब यदि मोहवश कोई परपदार्थको निज मानता है तो उसके लिये ये पर—आचार्य आदि अवश्य ही फलवाले हैं। अर्थात् इनसे वह सासारिक प्रयोजनकी सिद्धि कर सकता है ॥२२५॥ किन्तु जो बाह्यरूप आचार्य पद और धर्मका आदेश तथा उपदेश आदि रूप उसके फलको सर्वथा नही चाहता है उस आचार्यका तो फिर कहना ही क्या है, अर्थात् उसकी अन्तरग परिणतिमे ये बाह्यकार्य बिलकुल ही कारण नही हो सकते ॥२२६॥ धर्मके आदेश आदि कार्योंमे आचार्य निरीह होते हैं यह बात असिद्ध नही है, क्योंकि न्यायसे इन्द्रियोंके विषयोंकी आकाक्षा ही ईहा मानी गई है अन्यत्र की गई इच्छा कभी भी ईहा नहीं मानी गई है ॥२२७॥ शंका—कहीं भी क्रियाके विना इच्छा नहीं होती है और इच्छाके बिना क्रिया नहीं होती है इसलिये इन्द्रियोंके विषय रहे या न रहे, तथापि बिना इच्छाके क्रिया नहीं हो सकती ? ॥२२८॥

नैवं हेतोरतिव्याप्तेरारादाक्षीणमोहिषु । बन्धस्य नित्यतापत्तेर्भवेन्मुक्तेरसम्भवः ॥२२९
ततोऽस्त्यन्तःकृतो भेदः शुद्धेर्नांशांशतस्त्रिषु । निर्विशेषात्समस्त्वेष पक्षो माभूद्बहिः कृतः ॥२३०
किञ्चाऽस्ति यौगिकी रूढिः प्रसिद्धा परमागमे । विना साधुपदं न स्यात्केवलोत्पत्तिरञ्जसा ॥२३१
तत्राकूतमिदं सम्यक् साक्षात्सर्वार्थदर्शिनः । क्षणमस्ति स्वतः श्रेण्यामधिरूढस्य तत्पदम् ॥२३२
यतोऽवश्यं स सूरिर्वा पाठकः श्रेण्यनेहसि । कृत्स्नचिन्तानिरोधात्मलक्षणं ध्यानमाश्रयेत् ॥२३३
ततः सिद्धमनायासात्तत्पदत्वं तयोरिह । नूनं बाह्योपयोगस्य नावकाशोऽस्ति तत्र यत् ॥२३४
न पुनश्चरणं तत्र छेदोपस्थापना वरम् । प्रागादाय क्षणं पश्चात्सूरिः साधुपदं श्रयेत् ॥२३५
उक्तं दिग्मात्रमत्राऽपि प्रसङ्गाद्गुरुलक्षणम् । शेषं विशेषतो ज्ञेयं तत्स्वरूपं जिनागमात् ॥२३६
धर्मो नीचपदादुच्चैः पदे धरति धार्मिकम् । तत्राजवञ्जवो नीचैः पदमुच्चैस्तदत्ययः ॥२३७
सम्यग्दृग्ज्ञप्तिचारित्रं धर्मो रत्नत्रयात्मकः । तत्र सद्दर्शनं मूलं हेतुरद्वैतमेतयोः ॥२३८
ततः सागाररूपो वा धर्मोऽनागार एव वा । सद्दृक्-पुरस्सरो धर्मो न धर्मस्तद्विना क्वचित् ॥२३९
रूढितोऽधिवपुर्वाचां क्रिया धर्मः शुभावहा । तत्रानुकूलरूपा वा मनोवृत्तिः सहानया ॥२४०
सा द्विधा सा च सागारानागाराणां विशेषतः । यतः क्रियाविशेषत्वान्नूनं धर्मो विशेषतः ॥२४१
तत्र हिंसानृतस्तेयाब्रह्मकृत्स्नपरिग्रहात् । देशतो विरतिः प्रोक्तं गृहस्थानामणुव्रतम् ॥२४२

समाधान—ऐसा नही है, क्योकि ऐसा माननेपर यह लक्षण क्षीणमोही और उनके समीपवर्ती गुणस्थानवालोमे अतिव्याप्त हो जाता है और यदि यहाँ भी इच्छापूर्वक क्रिया मानी जाती है तो बन्धको नित्यताकी आपत्ति प्राप्त होनेसे मुक्ति असम्भव हो जाती है ॥२२९॥ इसलिये विशुद्धिके नाना अशोकी अपेक्षासे अन्तरगकृत भेद है यह पक्ष सामान्यरूपसे तीनोमे माना जाना चाहिये। इसे बाह्य क्रियाकी अपेक्षासे मानना उचित नही है ॥२३०॥ दूसरे परमागममे जो यह सार्थकरूढ़ि प्रसिद्ध है कि साधुपदको प्राप्त किये विना नियमसे केवलज्ञानकी उत्पत्ति नही होती है ॥२३१॥ सो इस विषयमे समस्त पदार्थोको साक्षात् जाननेवाले सर्वज्ञदेवने यह ठीक ही कहा है कि श्रेणीपर चढ़े हुए जीवके वह साधुपद क्षणमात्रमे स्वत प्राप्त हो जाता है ॥२३२॥ क्योकि चाहे आचार्य हो या उपाध्याय, श्रेणीपर चढ़नेके समय वह नियमसे सम्पूर्ण चिन्ताओके निरोध रूप ध्यानको धारण करता है ॥२३३॥ इसलिये यह बात सिद्ध हुई कि आचार्य और उपाध्यायके श्रेणी आरोहणके समय साधुपद अनायास होता है क्योकि वहाँपर बाह्य उपयोगको कोई अवकाश नही है ॥२३४॥ किन्तु ऐसा नही है कि आचाय पहले छेदोपस्थापना रूप उत्तम चारित्रको ग्रहण करके पश्चात् साधुपदको धारण करता है ॥२३५॥ इस प्रकार यहाँपर प्रसगवश सक्षेपमे गुरुका लक्षण कहा। उनका शेषस्वरूप विशेषरूपसे जिनागमसे जानना चाहिये ॥२३६॥ जो धर्मात्मा पुरुषको नीच स्थानसे उठाकर उच्चस्थानमे धरता है वह धर्म है। यहाँ ससार नीच स्थान है और उसका नाशरूप मोक्ष उच्चस्थान है ॥२३७॥ वह धर्म सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र इन तीन रूप है। उन तीनोमेसे सम्यग्दर्शन इन दोनोके समीचीनपनेका एकमात्र कारण है ॥२३८॥ इसलिए गृहस्थ धर्म या मुनिधर्म जो भी धर्म है वह सम्यग्दर्शनपूर्वक होनेसे ही धर्म है। सम्यग्दर्शनके विना कही भी धर्म नही ॥२३९॥ फिर भी रूढ़िसे शरीर और वचनकी शुभफल देनेवाली क्रियाको धर्म कहते हैं या शरीर और वचनकी शुभ क्रियाके साथ जो अनुकूल मनकी प्रवृत्ति होती है उसे धर्म कहते हैं ॥२४०॥ सम्पूर्ण गृहस्थ और मुनियोके भेदसे वह क्रिया दो प्रकारकी है, क्योकि क्रियाके भेदसे ही धर्ममे भेद होता है ॥२४१॥ इन दोनोमेसे जो हिंसा, झूठ, चोरी, कुशील और समस्त परिग्रह इनसे एकदेश विरति

यतेर्मूलगुणाश्चाष्टाविंशतिर्मूलवत्तरोः । नात्राप्यन्यतरेणोना नातिरिक्ता कदाचन ॥२४३
सर्वैरेभि समस्तैश्च सिद्धं यावन्मुनिव्रतम् । न व्यस्तैर्व्यस्तमात्रं तु यावदंशनयादपि ॥२४४

उक्तं च—

> वदसमिदिंदियरोधो लोचो आवसयमचेलमण्हाणं ।
> खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च ॥२०

एते मूलगुणा प्रोक्ता यतीना जैनशासने । लक्षाणां चतुरशीतिर्गुणाश्चोत्तरसंज्ञका ॥२४५
तत सागारधर्मो वाऽनगारो वा यथोदित । प्राणिसंरक्षण मूलमुभयत्राविशेषत ॥२४६
उक्तमस्ति क्रियारूपं व्यासाद्व्रतकदम्बकम् । सर्वसावद्ययोगस्य तदेकस्य निवृत्तये ॥२४७
अर्थाज्जैनोपदेशोऽयमस्त्यादेश स एव च । सर्वसावद्ययोगस्य निवृत्तिर्व्रतमुच्यते ॥२४८
सर्वशब्देन तत्रान्तर्बहिर्वृत्तिपदार्थत । प्राणोच्छेदो हि सावद्य सैव हिंसा प्रकीर्तिता ॥२४९
योगस्तत्रोपयोगो वा बुद्धिपूर्व स उच्यते । सूक्ष्मश्चाबुद्धिपूर्वो य स स्मृतो योग इत्यपि ॥२५०
तस्याभावो निवृत्ति स्याद्व्रत चार्थादिति स्मृति । अंशात्साप्यंशतस्तत्सा सर्वत सर्वतोऽपि तत्॥२५१
सर्वत. सिद्धमेवैतद् व्रत बाह्यं दयाङ्गिषु । व्रतमन्त कषायाणां त्याग सैवात्मनि क्रिया ॥२५२
लोकासंख्यातमात्रास्ते यावद्रागादय स्फुटम् । हिंसायास्तत्परित्यागो व्रत धर्मोऽथवा किल ॥२५३

है वह गृहस्थोका अणुव्रत कहा गया है ॥२४२॥ यतिके अट्ठाईस मूलगुण होते हैं। वे ऐसे हैं जैसे कि वृक्षका मूल होता है। कभी भी इनमेंसे न तो कोई कम होता है और न अधिक ही होता है ॥२४३॥ समस्तरूप इन सब गुणोके द्वारा ही पूरा पूरा मुनिव्रत सिद्ध होता है, व्यस्तरूप इन सब गुणोके द्वारा नही, क्योकि एक अशको ग्रहण करनेवाले नयकी अपेक्षा तो वह व्यस्तरूप ही सिद्ध होता है, पूरा मुनिव्रत नही सिद्ध होता ॥२४४॥

कहा भी है—'पाँच महाव्रत, पाँच समिति, पाँचो इन्द्रियोका निरोध करना, केशलोच, छह आवश्यक, नग्न रहना, स्नान नही करना, जमीनमे सोना, दन्तधावन नही करना, खडे होकर आहार लेना और एक बार भोजन करना ये अट्ठाईस मूलगुण है ॥२०॥

जैनशासनमे यतियोके ये मूलगुण कहे हैं। उनके उत्तरगुण चौरासी लाख होते हैं ॥२४५॥ इसलिये जैसा सागारधर्म कहा गया है और जैसा मुनिधर्म कहा गया है उन दोनोमे सामान्यरीतिसे प्राणियोका सरक्षण मूल है ॥२४६॥ इसी प्रकार विस्तारसे क्रियारूप जितना भी व्रतोका समुदाय कहा गया है वह केवल एक सर्वसावद्ययोगकी निवृत्तिके लिये ही कहा गया है ॥२४७॥ अर्थात् जिनमतका यही उपदेश है और यही आदेश है कि सर्वसावद्ययोगकी निवृत्तिको ही व्रत कहते हैं ॥२४८॥ यहाँपर सर्व शब्दसे उसका यौगिक अर्थ अन्तरंग और बहिरग वृत्ति लिया गया है तथा सावद्य शब्दका अर्थ प्राणोका छेद करना है और वही हिंसा कही गई है। इस हिंसामे जो बुद्धि-पूर्वक उपयोग होता है वह योग है या जो अबुद्धिपूर्वक सूक्ष्म उपयोग होता है वह भी योग है ॥२४९-२५०॥ तथा इस सर्वसावद्ययोगका अभाव होना ही उससे निवृत्ति है और वही वास्तवमें व्रत माना गया है। यदि सर्वसावद्ययोगकी निवृत्ति अशरूपसे होती है तो व्रत भी एकदेश होता है और यदि वह सब प्रकारसे होती है तो व्रत भी सर्वदेश होता है ॥२५१॥ इस प्रकार यह बात सब प्रकारसे सिद्ध हो गयी कि प्राणियोपर दया करना बाह्य व्रत है और कषायोका त्याग करना अन्तरंग व्रत है। अपनी आत्मापर कृपा भी यही है ॥२५२॥ क्योकि जबतक असख्यात लोकप्रमाण

आत्मेतराङ्गिणामङ्गरक्षणं यन्मतं स्मृतौ । तत्परं स्वात्मरक्षायाः कृतेनातः परत्र तत् ॥२५४

सत्सु रागादिभावेषु बन्धः स्यात्कर्मणां बलात् । तत्पाकादात्मनो दुःखं तत्सिद्धः स्वात्मनो वधः ॥

ततः शुद्धोपयोगो यो मोहकर्मोदयादृते । चारित्रापरनामैतद्व्रतं निश्चयतः परम् ॥२५६

रूढेः शुभोपयोगोऽपि ख्यातश्चारित्रसंज्ञया । स्वार्थक्रियामकुर्वाणः सार्थनामा न निश्चयात् ॥२५७

किन्तु बन्धस्य हेतुः स्यादर्थात्तत्प्रत्यनीकवत् । नासौ वरं वरं यः स नापकारोपकारकृत् ॥२५८

विरुद्धकार्यकारित्वं नास्यासिद्धं विचारसात् । बन्धस्यैकान्ततो हेतोः शुद्धादन्यत्र सम्भवात् ॥२५९

नोह्यं प्रज्ञापराधत्वान्निर्जराहेतुरंशतः । अस्ति नाबन्धहेतुर्वा शुभो नाप्यशुभावहात् ॥२६०

कर्मादानक्रियारोधः स्वरूपाचरणं च यत् । धर्मः शुद्धोपयोगः स्यात्सैव चारित्रसंज्ञकः ॥२६१

उक्तं च—

चारित्तं खलु धम्मो धम्मो जो सो समोत्तिणिद्दिट्ठो ।
मोहक्खोहविहीणो परिणामो अप्पणो हु समो ॥२१

ननु सद्दर्शनज्ञानचारित्रैर्मोक्षपद्धतिः । समस्तैरेव न व्यस्तैस्तत्किं चारित्रमात्रया ॥२६२

सत्यं सद्दर्शनं ज्ञानं चारित्रान्तर्गतं मिथः । त्रयाणामविनाभावाद् रत्नत्रयमखण्डितम् ॥२६३

वे रागादिक भाव रहते हैं तबतक ज्ञानादिक धर्मोंकी हिंसा होनेसे आत्माकी हिंसा होती रहती है ॥२५३॥ आशय यह है कि वास्तवमे रागादि भाव ही हिंसा है, अधर्म है, व्रतसे च्युत होना है और रागादिका त्याग करना ही अहिंसा है, व्रत है अथवा धर्म है ॥२५४॥ रागादि भावोके होनेपर कर्मोंका बन्ध नियमसे होता है और उस बँधे हुए कर्मके उदयसे आत्माको दुःख होता है इसलिये रागादि भावोका होना आत्मवध है यह बात सिद्ध होती है ॥२५५॥ इसलिये मोहनीय कर्मके उदयसे अभावमे जो शुद्धोपयोग होता है उसका दूसरा नाम चारित्र है और वही निश्चयसे उत्कृष्ट व्रत है ॥२५६॥ चारित्र सब प्रकारसे अपनी अर्थक्रियाको करता हुआ भी निर्जराका कारण है यह बात न्यायसे भी अबाधित है इसलिये वह दीपकके समान साथक नामवाला है ॥२५७॥ किन्तु वह अशुभोपयोगके समान वास्तवमे बन्धका कारण है इसलिये यह श्रेष्ठ नही है। श्रेष्ठ वह है जो न तो उपकार ही करता है और न अपकार ही करता है ॥२५८॥ शुभोपयोग विरुद्ध कार्यकारी है यह बात विचार करनेपर असिद्ध भी नही प्रतीत होती, क्योकि शुभोपयोग एकान्तसे बन्धका कारण होनेसे वह शुद्धोपयोगके अभावमे हो पाया जाता है ॥२५९॥ बुद्धि दोषसे ऐसी तर्कणा भी नहीं करनी चाहिये कि शुभोपयोग एक देशनिर्जराका कारण है, क्योकि न तो शुभोपयोग ही बन्धके अभावका कारण है और न अशुभोपयोग ही बन्धके अभावका कारण है ॥२६०॥ कर्मोंके ग्रहण करनेकी क्रियाका रुक जाना ही स्वरूपाचरण है। वही धर्म है, वही शुद्धोपयोग है और वही चारित्र है ॥२६१॥

कहा भी है—"निश्चयसे चारित्र ही धर्म है और जो धर्म है उसीको शम कहते हैं।" तात्पर्य यह है कि मोह और क्षोभसे रहित आत्माका परिणाम ही धर्म है ॥२१॥

शंका—जब कि सम्यग्ज्ञान, सम्यग्दर्शन और सम्यक्चारित्र इन तीनोके मिलनेपर ही मोक्षमार्ग होता है एक-एकके रहनेपर नही तब फिर केवल चारित्रको मोक्षमार्ग कहनेसे क्या प्रयोजन है ॥२६२॥ समाधान—यह कहना ठीक है तथापि सम्यग्दर्शन और सम्यग्ज्ञान ये दोनो मिलकर चारित्रमे गर्भित हैं, क्योकि तीनोका परस्पर अविनाभाव सम्बन्ध होनेसे ये तीनो

किञ्च सद्दर्शनं हेतुः संविच्चारित्रयोर्द्वयो. । सम्यग्विशेषणस्योच्चैर्यद्वा प्रत्यग्रजन्मन ॥२६४
अर्थोऽयं सति सम्यक्त्वे ज्ञानचारित्रमत्र यत् । भूतपूर्वं भवेत्सम्यक् सूते वाऽभूतपूर्वकम् ॥२६५
शुद्धोपलब्धिशक्तिर्या लब्धिज्ञानातिशायिनी । सा भवेत्सति सम्यक्त्वे शुद्धो भावोऽथवापि च ॥२६६
यत्पुनर्द्रव्यचारित्रं श्रुतज्ञान विनापि दृक् । न तज्ज्ञानं न चारित्रमस्ति चेत्कर्मबन्धकृत् ॥२६७
तेषामन्यतमोद्देशो नालं दोषाय जातुचित् । मोक्षमार्गैकसाध्यस्य साधकानां स्मृतेरपि ॥२६८
बन्धो मोक्षश्च ज्ञातव्यः समासात्प्रश्नकोविदै । रागांशैर्बन्ध एव स्यान्नारागांशैः कदाचन ॥२६९

उक्तं च—

येनांशेन सुदृष्टिस्तेनांशेनास्य बन्धन नास्ति । येनांशेन तु रागस्तेनांशेनास्य बन्धनं भवति ॥२२
येनांशेन तु ज्ञान तेनांशेनास्य बन्धनं नास्ति । येनांशेन तु रागस्तेनांशेनास्य बन्धन भवति ॥२३
येनांशेन चारित्र तेनांशेनास्य बन्धनं नास्ति । येनांशेन तु रागस्तेनांशेनास्य बन्धनं भवति ॥२४
उक्तो धर्मस्वरूपोऽपि प्रसङ्गात्सङ्गतोंऽशत । कविर्लब्धावकाशस्तं विस्तराद्वा करिष्यति ॥२७०
देवे गुरौ तथा धर्मे दृष्टिस्तत्त्वार्थदर्शिनी । ख्याताप्यमूढदृष्टिः स्यादन्यथा मूढदृष्टिता ॥२७१
सम्यक्त्वस्य गुणोऽप्येष नाल दोषाय लक्षित । सम्यग्दृष्टिर्यतोऽवश्यं यथा स्यान्न तथेतर ॥२७२

अखण्डित हैं ॥२६३॥ दूसरी बात यह है कि सम्यग्दर्शन यह ज्ञान और चारित्र इन दोनोमे सम्यक् विशेषणका हेतु है। अथवा जो ज्ञान और चारित्र नूतन होते हैं उनमे सम्यक् विशेषणका एकमात्र यही हेतु है ॥२६४॥ इसका यह अभिप्राय है कि पहलेका जो ज्ञान और चारित्र होता है वह सम्यग्दर्शनके होनेपर समीचीन हो जाता है। अथवा सम्यग्दर्शन यह अभूतपूर्वज्ञान और चारित्रको जन्म देता है ॥२६५॥ शुद्ध आत्माके जाननेकी शक्ति जो कि ज्ञानमें अतिशय लानेवाली लब्धिरूप है वह सम्यक्त्वके होनेपर ही होती है। अथवा शुद्धभाव भी सम्यक्त्वके होनेपर ही होता है ॥२६६॥ और जो द्रव्य चारित्र और श्रुतज्ञान है वह यदि सम्यग्दर्शनके बिना होता है तो वह न ज्ञान है न चारित्र है। यदि है तो केवल कर्मबन्ध करनेवाला है ॥२६७॥ इसलिये इन तीनोमेसे किसी एकको कथन करना कभी भी दोषाधायक नही है, क्योकि मोक्षमार्ग एक साध्य है और ये तीनो इसके साधक माने गये हैं ॥२६८॥ प्रश्नके अभिप्रायको जाननेवाले पुरुषोको सक्षेपमे बन्ध और मोक्षका स्वरूप इस प्रकार जानना चाहिये कि रागांशरूप परिणामोसे बन्ध होता है और रागाश-रूप परिणामोके नही रहनेसे कभी भी बन्ध नही होता ॥२६९॥

कहा भी है—'जिस अशसे यह सम्यग्दृष्टि है उस अंशसे इसके बन्ध नही होता है। किन्तु जिस अशसे राग है उस अंशसे इसके बन्ध अवश्य होता है ॥२२॥ जिस अंशसे ज्ञान है, उस अंशसे उसके कर्म-बन्ध नही होता, किन्तु जिस अंशसे राग है, उस अंशसे कर्म-बन्ध होता है ॥२३॥ जिस अंशसे चारित्र है, उस अशसे उसके कर्म-बन्ध नही होता, किन्तु जिस अंशसे राग है, उस अशसे कर्म-बन्ध होता है ॥२४॥

इस प्रकार प्रसंगवश संक्षेपसे युक्तियुक्त धर्मका स्वरूप कहा। कवि यथावकाश उसका विस्तारसे कथन आगे करेगा ॥२७०॥ समस्त कथनका सार यह है कि देव, गुरु और धर्ममे यथार्थताको देखनेवाली दृष्टि ही अमूढदृष्टि कही गयी है और इससे विपरीत दृष्टि ही मूढ दृष्टि है ॥२७१॥ यह भी सम्यक्त्वका गुण है। यह किसी प्रकार भी दोषकारक नहीं है, क्योकि जो सम्यग्दृष्टि है वह नियमसे अमूढदृष्टि होता है और जो सम्यग्दृष्टि नही है वह अमूढ दृष्टि

उपबृंहणनामास्ति गुण सम्यग्दृगात्मन । लक्षणादात्मशक्तीनामवश्य बृंहणादिह ॥२७३
आत्मशुद्धेरदौर्बल्यकरणं चोपबृंहणम् । अर्थाद्दृग्ज्ञप्तिचारित्रभावादस्खलनं हि तत् ॥२७४
जानन्नप्येष निःशेषादपौरुषं नात्मदर्शने । तथापि यत्नवानत्र पौरुषं प्रेरयन्निव ॥२७५
नायं शुद्धोपलब्धौ स्याल्लेशतोऽपि प्रमादवान् । निष्प्रमादतयात्मानमादधान समादरात् ॥२७६
यद्वा शुद्धोपलब्ध्यर्थमभ्यसेदपि तद्बहि । सत्क्रियां काञ्चिदप्यर्थात्तत्साध्यानुपयोगिनाम् ॥२७७
रसेन्द्रं सेवमानोऽपि काम्यपथ्य न वाचरेत् । आत्मनोऽनुल्लाघतामुज्झन्नोज्झन्नुल्लाघतामपि ॥२७८
यद्वा सिद्धं विनायासात्स्वतस्तत्रोपबृंहणम् । ऊर्ध्वमूर्ध्वं गुणश्रेणौ निर्जराया सुसम्भवात् ॥२७९
अवश्यं भाविनी तत्र निर्जरा कृत्स्नकर्मणाम् । प्रतिसूक्ष्मक्षणं यावदसंख्येयगुणक्रमात् ॥२८०
न्यायादायातमेतद्वै यावतांशेन तत्क्षितौ । वृद्धि शुद्धोपयोगस्य वृद्धिर्वृद्धि पुन पुन ॥२८१
यथा यथा विशुद्धि स्याद्वृद्धिरन्त प्रकाशिनी । तथा तथा हृषीकानामुपेक्षा विषयेष्वपि ॥२८२
ततो भूम्नि क्रियाकाण्डे नात्मशक्ति स लोपयेत् । किन्तु संवर्धयन्नून यत्नादपि च दृष्टिमान् ॥२८३
उपबृंहणनामापि गुण सद्दर्शनस्य य । गणितो गणनामध्ये गुणानां नागुणाय च ॥२८४
सुस्थितीकरण नाम गुण सद्दर्शनस्य य । धर्माच्च्युतस्य धर्मे तन्नाधर्मे धर्मिण क्षते ॥२८५

कभी नही होता ॥२७२॥ सम्यग्दृष्टि जीवका उपबृहण नामका भी एक गुण है। आत्मीक शक्तियो की नियमसे वृद्धि करना यह इसका लक्षण है ॥२७३॥ आत्माकी शुद्धिमे दुर्बलता न आने देना या उसकी पुष्टि करना उपबृहण है। अर्थात् आत्माको सम्यग्दशन, सम्यग्ज्ञान और सम्यक्चारित्र रूप भावसे च्युत नही होने देना ही उपबृहण है ॥२७४॥ यह जीव जानता हुआ भी आत्म-साक्षात्कारके विषयमे पूरी तरहसे पुरुषार्थ नही कर पाता। तथापि पुरुषार्थकी प्रेरणा देता हुआ ही मानो इस विषयमे प्रयत्नवान् रहता है ॥२७५॥ यह शुद्धोपलब्धिमे रचमात्र भी प्रमादी नही होता है किन्तु प्रमादरहित होकर आदरसे आत्मीक कार्योमे लगा रहता है ॥२७६॥ अथवा शुद्धोपलब्धिके लिये यह उस आत्मीक कार्यमे उपयोगी पडनेवाली किही बाहरी सत्क्रियाओका भी अभ्यास करता है ॥२७७॥ जैसे पारद भस्मको सेवन करता हुआ भी कोई पुरुष पथ्य करता है और कोई पुरुष पथ्य नही भी करता है। जो पथ्य करता है वह अपने रोगसे मुक्ति पा लेता है और जो पथ्य नही करता है वह अपनी नीरोगताको भी खो बैठता है। वैसे ही प्रकृतमे जानना चाहिये ॥२७८॥ अथवा सम्यग्दृष्टिके बिना ही प्रयत्नके स्वभावसे उपबृहण गुण होता है, क्योकि इसके ऊपर गुणश्रेणी निर्जरा पाई जाती है ॥२७९॥ इसके समस्त कर्मोकी प्रतिसमय असख्यात गुण क्रमसे निर्जरा अवश्य होती रहती है ॥२८०॥ इसलिये यह बात युक्तिसे प्राप्त हुई कि इसके जितने रूपमे कर्मोका क्षय होता है उतनी शुद्धोपयोगकी वृद्धि होती है। इस प्रकार वृद्धिके बाद वृद्धि बराबर होती जाती है ॥२८१॥ इसके जैसे जैसे विशुद्धिकी भीतर प्रकाश देनेवाली वृद्धि होती है वैसे वैसे इन्द्रियोके विषयमे भी इसके उपेक्षा होती जाती है ॥२८२॥ इसलिये बडे भारी क्रियाकाण्डमे वह सम्यग्दृष्टि अपनी शक्तिको न छिपावे। किन्तु प्रयत्नसे भी अपनी शक्तिको बढ़ावे ॥२८३॥ इस प्रकार सम्यग्दर्शनका जो उपबृहण नामका गुण है वह भी गुणोकी गणनामे आ जाता है। वह दोषाधायक नही है ॥२८४॥ सम्यग्दृष्टिका एक स्थितीकरण नामका गुण है। जो धर्मसे च्युत हो गया है उसका धर्ममे स्थित करना स्थितीकरण है। किन्तु अधर्मसे च्युत हुए जीवको अधर्ममे स्थित करना स्थितीकरण नही है ॥२८५॥ कितने ही अल्पज्ञानी भावी धर्मकी

न प्रमाणीकृतं वृद्धैर्धर्मायाधर्मसेवनम् । भाविधर्माशया केचिन्मन्दाः सावद्यवादिनः ॥२८६
परम्परेति पक्षस्य नावकाशोऽत्र लेशतः । मूर्खादन्यत्र को मोहाच्छीतार्थी वह्निमाविशेत् ॥२८७
नैतद्धर्मस्य प्राग्रूपं प्रागधर्मस्य सेवनम् । व्याप्तेरपक्षधर्मत्वाद्धेतोर्वा व्यभिचारतः ॥२८८
प्रतिसूक्ष्मक्षणं यावद्धेतोः कर्मोदयात्स्वतः । धर्मो वा स्यादधर्मो वाऽप्येष सर्वत्र निश्चयः ॥२८९
तत्स्थितीकरणं द्वेधा साक्षात्स्वपरभेदतः । स्वात्मनः स्वात्मतत्त्वेऽर्थात् परतत्त्वे परस्य तत् ॥२९०
तत्र मोहोदयोद्रेकाच्च्युतस्यात्मस्थितेश्चितः । भूयः संस्थापनं स्वस्य स्थितीकरणमात्मनि ॥२९१
अयं भावः क्वचिद्दैवाद्दर्शनात्स पतत्यधः । व्रजत्यूर्ध्वं पुनर्दैवात्सम्यगासाद्य दर्शनम् ॥२९२
अथ क्वचिद्यथाहेतोर्दर्शनादपतन्नपि । भावशुद्धिमधोधोंऽशैर्गच्छत्यूर्ध्वं स रोहति ॥२९३
क्वचिद्बहिः शुभाचारं स्वीकृतं चाऽपि मुञ्चति । न मुञ्चति कदाचिद्वै मुक्त्वा वा पुनराचरेत् २९४
यद्वा बहिः क्रियाचारे यथावस्थं स्थितेऽपि च । कदाचिद्दीप्यमानोऽन्तर्भावैर्भूत्वा च वर्तते ॥२९५
नासम्भवमिदं यस्माच्चारित्रावरणोदयः । अस्ति तरतमस्वांशैर्गच्छन्निम्नोन्नतामिह ॥२९६
अत्राभिप्रेतमेवैतत् स्वस्थितीकरणं स्वतः । न्यायात्कुतश्चिदत्रापि हेतुस्तत्रानवस्थितिः ॥२९७
सुस्थितीकरणं नाम परेषां सदनुग्रहात् । भ्रष्टानां स्वपदात्तत्र स्थापनं तत्पदे पुनः ॥२९८
धर्मादेशोपदेशाभ्यां कर्तव्योऽनुग्रहः परे । नात्मवृत्तं विहायाशु तत्परः पररक्षणे ॥२९९

आशासे सावद्यका उपदेश देते हैं किन्तु ज्ञानी पुरुषोने धर्मके लिए अधर्मका सेवन करना प्रमाण नही माना है ॥२८६॥ 'अधर्मके सेवन करनेसे परम्परा धर्म होता है' इस पक्षको यहाँ थोडा भी अवकाश नही है, क्योंकि मूर्खको छोडकर कोई भी प्राणी मोहवश शीतके लिए अग्निमें प्रवेश नही करता है ॥२८७॥ पहले अधर्मका सेवन करना यह धर्मका पूर्व रूप नही हो सकता, क्योंकि ऐसा माननेपर व्याप्ति पक्षधर्मसे रहित हो जाती है और हेतु व्यभिचारी हो जाता है ॥२८८॥ प्रति समय जबतक कर्मोंका उदय रूप हेतु मौजूद है तब तक स्वत धर्म भी हो सकता है और अधर्म भी हो सकता है यह सर्वत्र नियम है ॥२८९॥ यह प्रत्यक्षसे प्रतीत होता है कि वह स्थितीकरण स्व और परके भेदसे दो प्रकारका है। अपनी आत्माको अपने आत्मतत्त्वमे स्थित करना यह स्वस्थितीकरण है और अन्यकी आत्माको उसके आत्मतत्त्वमे स्थित करना यह परस्थितीकरण है ॥२९०॥ मोहके उदयकी तीव्रतावश आत्मस्थितिसे डिगे हुए आत्माको फिरसे अपनी आत्मामे स्थित करना स्वस्थितीकरण है ॥२९१॥ आशय यह है कि कभी दैववश वह जीव सम्यग्दर्शनसे नीचे गिर जाता है। और कभी दैववश सम्यग्दर्शनको पाकर ऊपर चढता है ॥२९२॥ अथवा कभी अनुकूल कारण सामग्रीके मिलने पर सम्यग्दर्शनसे नही गिरता हुआ भी भावोकी शुद्धिको नीचे नीचेके अशोसे ऊपर ऊपरको बढ़ाता है ॥२९३॥ कभी यह जीव बाह्य शुभाचारको स्वीकार करके भी छोड देता है और कदाचित् नही भी छोड़ता है। या कदाचित् छोडकर पुन ग्रहण कर लेता है ॥२९४॥ अथवा बाह्य क्रियाचारमें अवस्थानुसार स्थित रहता हुआ भी कदाचित् अन्तरंग भावोसे देदीप्यमान होता हुआ स्थित रहता है ॥२९५॥ और यह बात असम्भव भी नहीं है, क्योंकि इसके अपने तरतम रूप अशोके कारण हीनाधिक अवस्थाको प्राप्त होनेवाला चारित्र मोहनीयका उदय पाया जाता है ॥२९६॥ यहाँ इतना ही अभिप्राय है कि स्वस्थितिकरण होता है। इसमे कोई अन्य कारण नही है। यदि किसी नीतिवश इसमें किसी अन्य कारणकी कल्पना की जाती है तो अनवस्था दोष आता है ॥२९७॥ अपने पदसे भ्रष्ट हुए अन्य जीवोको सदनुग्रह भावसे उसी पदमें फिरसे स्थापित कर देना यह परस्थितीकरण है ॥२९८॥ धर्मके आदेश और उपदेश द्वारा ही

उक्तं च—

आदहिदं कादव्वं जइ सक्कइ परहिदं च कादव्वं। आदहिदपरहिदादो आदहिदं सुट्ठु कादव्वं ॥२५
उक्तो दिग्मात्रतोऽप्यत्र सुस्थितीकरणो गुणः। निर्जरायां गुणश्रेणौ प्रसिद्धः सुदृगात्मनः ॥३००
वात्सल्यं नाम दासत्वं सिद्धार्हद्बिम्बवेश्मसु। संघे चतुर्विधे शास्त्रे स्वामिकार्ये सुभृत्यवत् ॥३०१
अर्थादन्यतमस्योच्चैरुद्दिष्टेषु सुदृष्टिमान्। सत्सु घोरोपसर्गेषु तत्परः स्यात्तदत्यये ॥३०२
यद्वा न ह्यात्मसामर्थ्यं यावन्मन्त्रासिकोशकम्। तावद्द्रष्टुं च श्रोतुं च तद्बाधां सहते न सः ॥३०३
तद्द्विधाथ च वात्सल्यं भेदात्स्वपरगोचरात्। प्रधानं स्वात्मसम्बन्धिगुणो यावत्परात्मनि ॥३०४
परीषहोपसर्गाद्यैः पीडितस्यापि कस्यचित्। न शैथिल्यं शुभाचारे ज्ञाने ध्याने तदादिमम् ॥३०५
इतरत्प्रागिहाख्यातं गुणो दृष्टिमतः स्फुटम्। शुद्धज्ञानबलादेव यतो बाधापकर्षणम् ॥३०६
प्रभावनाङ्गसंज्ञोऽस्ति गुणः सद्दर्शनस्य वै। उत्कर्षकरणं नाम लक्षणादपि लक्षितम् ॥३०७
अर्थात्तद्धर्मस्य पक्षो नावद्यस्य मनागपि। धर्मपक्षक्षतेर्यस्मादधर्मोत्कर्षपोषणात् ॥३०८
पूर्ववत्सोऽपि द्वैविध्यं स्वान्यात्मभेदतः पुनः। तत्राद्यो वरमादेयः स्यादादेयो परोऽप्यतः ॥३०९
उत्कर्षो यद्बलाधिक्यादधिकीकरणं वृषे। असत्सु प्रत्यनीकेषु नालं दोषाय तत्क्वचित् ॥३१०

दूसरेका अनुग्रह करना चाहिए। किन्तु अपने व्रतको छोड़कर दूसरे जीवोकी रक्षा करनेमे तत्पर होना उचित नही है ॥२९९॥

कहा भी है—'सर्वप्रथम आत्महित करना चाहिए। यदि शक्य हो तो परहित भी करना चाहिए। किन्तु आत्महित और परहित इन दोनोमेंसे आत्महित भले प्रकार करना चाहिये ॥२५॥ इस प्रकार सक्षेपसे यहाँ पर स्थितीकरण गुण कहा जो कि सम्यग्दृष्टि जीवके गुण श्रेणी निर्जरामे भली प्रकार प्रसिद्ध है ॥३००॥ जिस प्रकार उत्तम सेवक स्वामीके कार्यमे दासभाव रखता है उसी प्रकार सिद्ध प्रतिमा, जिन बिम्ब, जिनमन्दिर, चार प्रकारका सघ और शास्त्र इन सबमे दासभाव रखना वात्सल्य अंग है ॥३०१॥ अभिप्राय यह है कि पूर्वोक्त सिद्ध प्रतिमा आदिमेसे किसी एक पर घोर उपसर्ग आने पर वह सम्यग्दृष्टि जीव इसके दूर करनेके लिए सदा तत्पर रहता है ॥३०२॥ अथवा यदि आत्मीक सामर्थ्य नही है तो जब तक मन्त्र, तलवार और धन है तब तक वह उन सिद्ध प्रतिमा आदि पर आई हुई बाधाको न तो देख ही सकता है और न सुन ही सकता है ॥३०३॥ स्व और परके भेदसे वह वात्सल्य दो प्रकारका है। इनमेसे अपनी आत्मासे सम्बन्ध रखनेवाला वात्सल्य प्रधान है और अन्य आत्मासे सम्बन्ध रखनेवाला वात्सल्य गौण है ॥३०४॥ परीषह और उपसर्ग आदिसे कही पर पीड़ित होकर भी शुभाचारमे, ज्ञानमे और ध्यानमे शिथिलता न लाना यह पहला स्ववात्सल्य है ॥३०५॥ दूसरा पर वात्सल्य इस ग्रन्थमे पहले कह आये हैं। वह भी सम्यग्दृष्टिका प्रकट गुण है क्योकि शुद्ध ज्ञानके बलसे ही बाधा दूर की जा सकती है ॥३०६॥ सम्यग्दर्शनका एक प्रभावना नामक गुण है। इसका लक्षण उत्कर्ष करना है। इसीसे यह जाना जाता है ॥३०७॥ हिंसा अतद्धर्म है इसलिये इस पक्षका थोडा भी पोषण नही करना चाहिए क्योकि अधर्मके उत्कर्षका पोषण करनेसे धर्म पक्षकी हानि होती है ॥३०८॥ पहले अगोके समान यह अग भी स्वात्मा और परात्माके भेदसे दो प्रकारका है। उनमेसे पहला अच्छी तरहसे उपादेय है और इसके बाद दूसरा भी उपादेय है ॥३०९॥ यत धर्मको हानि पहुँचाने वाले असमीचीन कारणोके रहने पर अधिक बल लगाकर धर्मको वृद्धि करना ही उत्कर्ष है अत ऐसा उत्सर्ग किसी भी हालत

मोहारातिक्षतेः शुद्ध शुद्धाच्छुद्धतरस्ततः । जीव शुद्धतम कश्चिदस्तीत्यात्मप्रभावना ॥३११
नायं स्यात्पौरुषायत्त किन्तु नूनं स्वभावतः । ऊर्ध्वमूर्ध्वं गुणश्रेणी यतः शुद्धिर्यथोत्तरा ॥३१२
बाह्यप्रभावनाङ्गोऽस्ति विद्यामन्त्रादिभिर्बलैः । तपोदानादिभिर्जैनधर्मोत्कर्षो विधीयताम् ॥३१३
परेषामपकर्षाय मिथ्यात्वोत्कर्षशालिनाम् । चमत्कारकरं किञ्चित्तद्विधेयं महात्मभिः ॥३१४
उक्त प्रभावनाङ्गोऽपि गुण सद्दर्शनस्य वै । येन सम्पूर्णतां याति दर्शनस्य गुणाष्टकम् ॥३१५

इति श्रावकाचारापरनामलाटीसंहितायां अष्टाङ्गसम्यग्दर्शनवर्णनो नाम तृतीयः सर्गः ।

मे दोषकारक नही है ॥३१०॥ कोई जीव मोहरूपी शत्रुका नाश होनेसे शुद्ध हो जाता है । कोई शुद्धसे शुद्धतर हो जाता है । और कोई शुद्धतम हो जाता है । इस प्रकार अपना उत्कर्ष करना स्वात्मप्रभावना है ॥३११॥ यह सब पौरुषाधीन नहीं है किन्तु स्वभावसे ही ऐसा होता है क्योंकि ऊपर ऊपर जैसे गुणश्रेणी निर्जरा बढती जाती है तदनुसार आगे आगे उसकी शुद्धि होती है ॥३१२॥ विद्या और मन्त्र आदि बलके द्वारा तथा तप और दान आदिके द्वारा जैनधर्मका उत्कर्ष करना बाह्य प्रभावना अग है ॥३१३॥ जो अन्य लोग मिथ्यात्वका उत्कर्ष चाहते है उनका अपकर्ष करनेके लिए महा पुरुषोको कुछ ऐसे कार्य करने चाहिए जो चमत्कार पैदा करनेवाले हों ॥३१४॥ इस प्रकार सम्यग्दर्शनका प्रभावना नामका गुण कहा । जिसके कारण सम्यग्दर्शनके आठों गुण पूर्णताको प्राप्त होते है ॥३१५॥ इन आठ गुणोंके सिवा सम्यग्दृष्टिके और भी बहुतसे गुण है ।

इस प्रकार श्रावकाचार अपर नाम लाटीसंहितामे अष्टाङ्ग सम्यग्दर्शनका वर्णन करनेवाला तीसरा सर्ग समाप्त हुआ ॥३॥

चतुर्थ सर्ग

शुद्धदर्शनिकोद्दाम्नो भावे सातिशय क्षमी । ऋजुर्जितेन्द्रियो धीरो व्रतमादातुमर्हति ॥१
शरीरभवभोगेभ्यो विरक्तो दोषदर्शनात् । अक्षातीतसुखैषी य स स्यान्नून व्रतार्हत ॥२
न स्यादणुव्रतार्हो यो मिथ्यान्धतमसा तत । लोलुपो लोलचक्षुश्च वाचालो निर्दय कुधी ॥३
मूढो गूढो शठप्रायो जाग्रन्मूर्च्छापरिग्रह । दुर्विनीतो दुराराध्यो निर्विवेकी समत्सर ॥४
निन्दकश्च विना स्वार्थं देवशास्त्रेष्वसूयक । उद्धतो वर्णवादी च वावदूकोऽप्यकारणे ॥५
आततायी क्षणावन्यो भोगाकाङ्क्षी व्रतच्छलात् । सुखाशयो धनाशश्च बहुमानी च कोपत ॥६
मायावी लोभपात्रश्च हास्याद्युद्रेककलङ्कित । क्षणादुष्ण क्षणाच्छीत क्षणाद्भीरु क्षणाद्भट ॥७
इत्याद्यनेकदोषाणामास्पद स्वपदास्थित । इच्छन्नपि व्रतादींश्च नाधिकारी स निश्चयात् ॥८

जिसका सम्यग्दर्शन शुद्ध है, जो अनेक प्रकारके तपश्चरणादिके क्लेश सहन करनेमे समर्थ है, जिसके परिणामोकी शुद्धता अत्यन्त विलक्षण और सबसे अधिक है, जो क्षमाको धारण करनेवाला है, जिसका मन, वचन, काय सरल है, जो इन्द्रियोको वशमे करनेवाला है और जो अत्यन्त धीरवीर है वही पुरुष व्रतोको धारण कर सकता है ॥१॥ जो मनुष्य शरीर, ससार और इन्द्रियोके भोगोको सदा नश्वर और असार समझता है और इसीलिये जो शरीर ससार और भोगोसे सदा विरक्त रहता है, इसके साथ जो आत्मजन्य अतीन्द्रिय सुखकी सदा इच्छा करता रहता है वही मनुष्य निश्चयसे व्रत धारण करनेके योग्य होता है ॥२॥ जो पुरुष मिथ्यात्वरूपी घोर अन्धकारसे व्याप्त हो रहा है, जो अत्यन्त चचल है, जिसके नेत्र सदा चचल रहते हैं, जो बहुत बोलनेवाला है, जो निर्दयी है, जिसकी बुद्धि विपरीत है, जो अत्यन्त मूर्ख है अथवा अत्यन्त मूर्खके समान है, जिसका मूर्च्छारूप परिग्रह अत्यन्त प्रज्वलित हो रहा है अथवा जिसकी तृष्णा या परिग्रह बढानेकी लालसा बहुत बढी हुई है, जो अत्यन्त अविनयी है, जो अधिक सेवा करनेसे भी प्रसन्न नही होता अर्थात् जिसका हृदय अत्यन्त कठोर है, जो निर्विवेकी है, सबसे ईर्ष्या, द्वेष करनेवाला है, सबकी निन्दा करनेवाला है तथा जो विना किसी अपने प्रयोजनके भी दूसरेकी निन्दा करता रहता है, जो देव शास्त्रोसे भी ईर्ष्या द्वेष करता है, जो अत्यन्त उद्धृत है, जो अत्यन्त निन्दनीय है, जो व्यर्थ ही बकवास करता रहता है तथा विना कारणके बकवाद करता रहता है, जो अनेक प्रकारके अत्याचार करनेवाला है, जिसका स्वभाव क्षण-क्षणमे बदलता रहता है, जिसे भोगोपभोगोकी तीव्र लालसा है, जो व्रतोका बहाना बनाकर अनेक प्रकारके भोगोपभोग सेवन करता है, जो सदा इन्द्रिय सम्बन्धी सुख चाहता रहता है, जिसको धनकी तीव्र लालसा है जो बहुत ही अभिमानी है, बहुत ही क्रोधी है बहुत ही मायाचारी है और बहुत ही लोभी है, जिसके हास्य, शोक, भय, जुगुप्सा, रति, अरति आदि कषाएँ तीव्र है, जो क्षणभरमे शान्त हो जाता है और क्षणभरमे क्रोधसे उबल पडता है, जो क्षणभरमे भयभीत हो जाता है और क्षणभरमे ही बहुत बडा शूरवीर बन जाता है, इस प्रकार जिसमे अनेक दोष भरे हुए हैं और जो अपने आत्माके स्वरूपमे लीन नही है ऐसा पुरुष यदि व्रतोके धारण करनेकी इच्छा भी करे तो भी निश्चयसे व्रतोंके धारण करनेका अधिकारी नही होता अतएव ऐसा पुरुष अणुव्रत धारण करनेके योग्य भी

न निषिद्धोऽथवा सोऽपि निर्दम्भश्चेद्व्रतोन्मुखः । मृदुमतिर्भोगाकाङ्क्षी स्याच्चिकित्स्यो न वञ्चकः ९
अर्थात्कालादिसंलब्धौ लब्धसद्दर्शनान्वितः । देशतः सर्वतश्चापि व्रती तत्त्वविदिष्यते ॥१०
विनाऽप्यनेहसो लब्धे कुर्वन्नपि व्रतक्रियाम् । हठादात्मबलाद्वापि व्रतंमन्योऽस्तु का क्षतिः ॥११
किन्त्वात्मनो यथाशक्ति तथेच्छन्वा प्रतिक्रियाम् । कश्चकोऽपि प्राणिरक्षार्थं कुर्वन्नार्यैर्न वारितः ॥१२
द्रव्यमात्रक्रियारूढो भावरिक्तो यदृच्छया । स्वल्पभोगं फलं तस्यास्तन्माहात्म्यादिहाश्नुते ॥१३
निर्देशोऽयं यथोक्तायाः क्रियायाः प्रतिपालनात् । छद्मनाऽथ प्रमादाद्वा नायं तस्याश्च साधकः ॥१४
अभव्यो भव्यमात्रो वा मिथ्यादृष्टिरपि क्वचित् । देशतः सर्वतो वापि गृह्णाति च व्रतक्रियाम् ॥१५
